# संस्कृत-वार्ता:

**दिनाङ्क :-11.08.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां नवाधिकैक शतं यावत् उच्च उत्पादक-जलवायु-जैव-सुदृढ-सस्य-प्रकाराणां विमोचनं करिष्यति। आयोजने प्रधानमन्त्री कृषकवैज्ञानिकैः सह अपि संवादं करिष्यति। प्रधानमन्त्रिकार्यालयेन विज्ञप्तौ सूचितं यत् नवाधिकैक शतं सस्यप्रकारकेषु एकषष्ठी सस्यानि सन्ति, येषु चतुस्त्रिंशत् कृषियोग्यानि-सस्यानि, सप्तविंशतिः उद्यानसस्यानि च सन्ति। कृषियोग्य सस्येषु कोदो, तैलबीजं, इक्षु, कपास, तन्तु,अन्येषां सम्भाव्यसस्य-बीजानाम् विमोचनं भविष्यति।

**गृहमंत्री**

केन्द्रीयगृहमंत्री अमितशाहः इक्षुदण्डम् अतिरिच्य, लवेटिका- भग्नतंडुल- अपशिष्ट फल- वेणुइत्यादीनां उपयोगं कृत्वा भविष्य कालिक दृष्टिकोणस्य स्वीकरणस्य आवश्यकतां प्रति बलम् अददात्। ह्य: नव दिल्ल्यां नेशनल्-फ़ेडरेशन्-आफ़्-को-आपरेटिव्-शूगर्-फ़्याक्टरीस्-लिमिटेड् इत्यस्मिन् आयोजिते कार्यक्रमे भाषणं कुर्वन् श्री शाह: अवदत् यत् इथेनाल इत्यस्य उत्पादनं लाभप्रदं व्यवहार्यं च व्यवसायः अस्ति तथा च आगमिषु वर्षेषु देशे एतस्य एक सहस्रम् कोटि-लीटरमितं यावत् आवश्यतां भविष्यति इति।

जैविक-इन्धनरूपेण पेट्रोल्-इत्यस्मिन् इथेनाल्-मिश्रणस्य सीमानं प्रशासनम् वर्धयति इति असौ उक्तवान्।

**वायनाड-प्रधामन्त्री**

प्रधानमन्त्री नरेन्द्र-मोदी केरल प्रान्ते जुलाई मासस्य त्रिंशत्- दिनाङ्के संजातेन भूस्खलनेन दुष्प्रभावितेषु क्षेत्रेषु एकं क्षेत्रं चूरामालां ह्य: सम्प्राप्तवान्। स: वायनाडस्य भूस्खलनेन प्रभावितानां क्षेत्राणां यात्रायाम् अस्ति। प्रधानमन्त्री विश्रान्त्युद्धार कार्येषु संलग्नै: सैन्यकर्मिभि: सह वार्तां कृतवान्। मोदिना सह राज्यपाल: आरिफ-मोहम्मद-खान: मुख्यमन्त्री पिनराई विजयन:, केन्द्रीय-मन्त्री सुरेश-गोपी एते आसन्।

**राष्ट्रपति: तिमोर:**

राष्ट्रपति: द्रौपदी मुर्मु: तिमोर-लेस्टे- इत्यस्य सर्वोच्च-नागरिक-सम्मानेन ग्रेंडकॉलर ऑफ ऑर्डर इत्यनेन सम्मानितवती। राष्ट्रपतिना जोसे-रामोस तो र्ता- वर्येण डिलि स्थाने राष्ट्रपति प्रासादे तस्मै सम्मानमिदं अलंङ्कृतम्। अवसरेऽस्मिन् राष्ट्रपतिना श्रीमत्या द्रौपदी-मुर्मु वर्यया तत्रत्य राष्ट्रपतिना हो र्ता- प्रधानमन्त्रिणा गुसमाओ वर्येण समं द्विपाक्षिक-सहयोग-सम्बन्धे सम्भाषणमपि विहितम्।

## विदेश-मन्त्री

विदेश मन्त्रिणा सुब्रह्मणयम जयशंकरेण प्रतिपादितं यत् प्रशासनं भारत-मालदीव-अन्य-क्षेत्रीय-जनानां लाभाय मालदीव-देशेन सार्धं घनिष्ठ-सम्बन्धान् प्रति वचनबद्धं वर्तते। डॉ. जयशंकर: त्रि-दिवसीय-यात्रायै मालदीव-देशे वर्तते। तेन राष्ट्रपतिनम् डॉ.मोहम्मद-मुइज्जु वर्येण समं सम्भाषणमपि विहितम्। तयो: मध्ये रक्षा-सुरक्षा सम्बद्ध-सहयोग-सामुद्रिक-सुरक्षायै संयुक्त-पदक्षेपानां विषये शान्ति-स्थिरतां च सन्धारयितुं तेषां हितानां विषये चर्चा जाता। विदेश-मन्त्रिणा आर्थिक-विकास-व्यापार-मन्त्री-वित्तमन्त्री-मालदीव-मौद्रिक-प्राधिकरणस्य प्रमुखेण समंपि चर्चा अपि सञ्जाता। डॉ. जयशंकरेण मालदीव-देशस्य अष्टाविंशति-द्वीपेषु जल-स्वच्छता-सम्बद्ध-परियोजनानां अपि आभासीय-तन्त्रांशस्य उद्घाटनं कृतम्।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

**।।इति वार्ता:।।**